# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा - दिसम्बर, २०१८

| | | |
|---|---|---|
| **कक्षा**- शास्त्री (SEM-5) | **प्रश्नपत्रम्**-८ (Old) | **गुणाः** - ७० |
| **विषयः** - धर्मशास्त्रम् | **कोड- CE- 3-5-10** | **समयः** - १० तः १ |
| **दिनाङ्कः** - १२/१२/२०१८ | **सन्दर्भग्रन्थः**- मनुस्मृतिः (९-१० अध्यायाः) | |

**॥ प्रथमान्वितिः ॥**

**प्र-१ द्वयोः श्लोकयोः ससन्दर्भं व्याख्या विधेया । १०**

१. इमं हि सर्ववर्णानां पश्यन्तो धर्ममुत्तमम् ।
यतन्ते रक्षितुं भार्यां भर्तारो दुर्बला अपि ॥

२. पतिं या नाऽभिचरति मनोवाग्देहसंयता ।
सा भर्तृलोकानाप्नोति सद्भिः सध्वीति चोच्यते ॥

३. उपपन्नो गुणैः सर्वैः पुत्रो यस्य तु दत्रिमः ।
स हरेतैव तद्रिक्थं सम्प्राप्तोऽव्यन्यगोत्रतः ॥

**प्र-२ द्वयोरेकस्य ग्रन्थोक्तदिशा वर्णनं कुरुत । १०**

१. स्त्रीरक्षणोपायान् स्त्रीदूषणानि च वर्णनं कुरुत ।

२. कन्यावरयोर्वयोनियमं विलिख्य स्वयंवरकालस्य वर्णनं कुरुत ।

**॥ द्वितीयान्वितिः ॥**

**प्र-३ द्वयोः श्लोकयोः ससन्दर्भं व्याख्या विधेया । १०**

१. सदृशं तु प्रकुर्याद् यं गुणदोषविचक्षणम् ।
पुत्रं पुत्रगुणैर्युक्तं स विज्ञेयश्च कृत्रिमः ॥

२. ईशो दण्डस्य वरुणो राज्ञां दण्दधरो हि सः ।
ईशः सर्वस्य जगतो ब्राह्मणो वेदपारगः ॥

३. प्रविश्य सर्वभूतानि यथा चरति मारुतः ।
तथा चारैः प्रवेष्टव्यं व्रतमेतद्धि मारुतम् ॥

**प्र-४ द्वयोरेकस्य ग्रन्थोक्तदिशा वर्णनं कुरुत । १०**

१. स्त्रीधनानि - इति विषयमवलम्ब्य विवेचनं कुरुत ।

२. पाषण्डादीनां देशान् निर्वासनं ग्रन्थोक्तं विवेचयत ।

## ॥ तृतीयान्वितिः ॥

**प्र-५ द्वयोः श्लोकयोः ससन्दर्भं व्याख्या विधेया ।** **१०**

१. ब्राह्मणः क्षत्रियो वैश्यस्त्रयो वर्णा द्विजातयः ।

चतुर्थ एकजातिस्तु शूद्रो नाऽस्ति तु पञ्चमः ॥

२. दिवा चरेयुः कार्यार्थं चिह्निता राजशासनैः ।

अबान्धवं शवं चैव निर्हरेयुरिति स्थितिः ॥

३. सप्त वित्ताऽगमा धर्म्या दायो लाभः क्रयोजयः ।

प्रयोगः कर्मयोगश्च सत्प्रतिग्रह एव च ॥

**प्र-६ द्वयोरेकस्य विवेचनं कुरुत ।** **१०**

१. वर्णसङ्कराणां कर्माणि विवेचनीयानि ।

२. प्रतिग्रहनिन्दां ग्रन्थोक्तदिशा विवेचयत ।

## ॥ चतुर्थान्वितिः ॥

**प्र-७ दशप्रश्नानां लघूत्तराणि यच्छत ।** **१०**

१. स्त्रियं कौमारे कः रक्षति?

२. मनुस्मृतेः दशमाऽध्याये श्लोकाः कति?

३. स्त्री कदा साध्वीति उच्यते?

४. बीजभूतः कः स्मृतः?

५. कनिष्ठभ्रातुः भार्या ज्येष्ठभ्रातुः कृते केन नाम्ना उच्यते?

६. ब्रह्मणा कथं मनुष्याः सृष्टाः?

७. कुलं कः वर्धयति?

८. दक्षः कश्यपाय कति पुत्रिकाः ददौ?

९. सुतः पितरं कस्मात् नरकात् त्रायते?

१०. स्वायम्भुवो मनुः नृणां कति पुत्रान् आह?

११. त्रयो वर्णाः ब्राह्मक्षत्रियवैश्याः किं कथ्यन्ते?

१२. ब्राह्मणाद् वैश्यकन्यायाम् ऊढायां किन्नाम पुत्रः जायते?

१३. कक्कुटकः कः स्मृतः?

१४. मनुस्मृतौ कति अध्यायाः वर्तन्ते?

१५. राष्ट्रं कदा क्षिप्रमेव विनश्यति?

–००–